শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একোনচৎৱারিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে একোনচৎৱারিংশং দশকম্॥

## যোগমাযানযনাদিৱর্ণনম্

ভৱন্তমযমুদ্বহন্ যদুকুলোদ্বহো নিস্সরন্
    দদর্শ গগনোচ্চলজ্জলভরাং কলিন্দাত্মজাম্।
অহো সলিলসঞ্চযঃ স পুনরৈন্দ্রজালোদিতো
    জলৌঘ ইৱ তৎক্ষণাৎ প্রপদমেযতামাযযৌ॥ **39.1** ॥

প্রসুপ্তপশুপালিকাং নিভৃতমারুদদ্বালিকা -
    মপাৱৃতকৱাটিকাং পশুপৱাটিকামাৱিশন্।
ভৱন্তমযমর্পযন্ প্রসৱতল্পকে তৎপদা -
    দ্বহন্ কপটকন্যকাং স্বপুরমাগতো ৱেগতঃ॥ **39.2** ॥

ততস্ত্বদনুজারৱক্ষপিতনিদ্রৱেগদ্রৱদ্ -
    ভটোৎকরনিৱেদিতপ্রসৱৱার্তযৈৱার্তিমান্।
ৱিমুক্তচিকুরোৎকরস্ত্বরিতমাপতন্ ভোজরা -
    ডতুষ্ট ইৱ দৃষ্টৱান্ ভগিনিকাকরে কন্যকাম্॥ **39.3** ॥

ধ্রুৱং কপটশালিনো মধুহরস্য মাযা ভৱে -
    দসাৱিতি কিশোরিকাং ভগিনিকাকরালিঙ্গিতাম্।
দ্বিপো নলিনিকান্তরাদিৱ মৃণালিকামাক্ষিপ -
    ন্নযং ৎৱদনুজামজামুপলপট্টকে পিষ্টৱান্॥ **39.4** ॥

ততো ভৱদুপাসকো ঝটিতি মৃত্যুপাশাদিৱ
    প্রমুচ্য তরসৈৱ সা সমধিরূঢরূপান্তরা।

অধস্তলমজগ্মুষী ৱিকসদষ্টবাহুস্ফুর -
ন্মহাযুধমহো গতা কিল ৱিহাযসা দিদ্যুতে॥ **39.5** ॥

নৃশংসতর কংস তে কিমু মযা ৱিনিষ্পিষ্টযা
বভূৱ ভৱদন্তকঃ ক্বচন চিন্ত্যতাং তে হিতম্।
ইতি ৎৱদনুজা ৱিভো খলমুদীর্য তং জগ্মুষী
মরুদ্গণপণাযিতা ভুৱি চ মন্দিরাণ্যেযুষী॥ **39.6** ॥

প্রগে পুনরগাত্মজাৱচনমীরিতা ভূভুজা
প্রলম্ববকপূতনাপ্রমুখদানৱা মানিনঃ।
ভৱন্নিধনকাম্যযা জগতি বভ্রমুর্নির্ভযাঃ
কুমারকৱিমারকাঃ কিমিৱ দুষ্করং নিষ্কৃপৈঃ॥ **39.7** ॥

ততঃ পশুপমন্দিরে ৎৱযি মুকুন্দ নন্দপ্রিযা -
প্রসূতিশযনেশযে রুদতি কিঞ্চিদঞ্চৎপদে।
ৱিবুধ্য ৱনিতাজনৈস্তনযসম্ভৱে ঘোষিতে
মুদা কিমু ৱদাম্যহো সকলমাকুলং গোকুলম্॥ **39.8** ॥

অহো খলু যশোদযা নৱকলাযচেতোহরং
ভৱন্তমলমন্তিকে প্রথমমাপিবন্ত্যা দৃশা।
পুনঃ স্তনভরং নিজং সপদি পাযযন্ত্যা মুদা
মনোহরতনুস্পৃশা জগতি পুণ্যৱন্তো জিতাঃ॥ **39.9** ॥

ভৱৎকুশলকাম্যযা স খলু নন্দগোপস্তদা
প্রমোদভরসঙ্কুলো দ্বিজকুলায কিন্নাদদাৎ।
তথৈৱ পশুপালকাঃ কিমু ন মঙ্গলং তেনিরে
জগত্ত্রিতযমঙ্গল ৎৱমিহ পাহি মামামযাৎ॥ **39.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে একোনচৎৱারিংশং দশকং সমাপ্তম্॥